SL. No. : DD

ಒಟ್ಟು ಪ್ರಶ್ನೆಗಳ ಸಂಖ್ಯೆ : 63 ]
Total No. of Questions : 63 ]

**CCE PF**
**REVISED**

[ ಒಟ್ಟು ಮುದ್ರಿತ ಪುಟಗಳ ಸಂಖ್ಯೆ : 8
[ Total No. of Printed Pages : 8

ಸಂಕೇತ ಸಂಖ್ಯೆ: **16-S** **Code No. : 16-S**

# ವಿಷಯ : ಪ್ರಥಮ ಭಾಷೆ — ಸಂಸ್ಕೃತ
# Subject : First Language — SANSKRIT
# प्रथम भाषा — संस्कृतम्

**( ಹೊಸ ಪಠ್ಯಕ್ರಮ / New Syllabus )**

**( ಖಾಸಗಿ ಅಭ್ಯರ್ಥಿ / Private Fresh )**

ದಿನಾಂಕ : 23. 03. 2018 ] [ Date : 23. 03. 2018

ಸಮಯ : ಬೆಳಿಗ್ಗೆ 9-30 ರಿಂದ ಮಧ್ಯಾಹ್ನ-12-45 ರವರೆಗೆ ] [ Time : 9-30 A.M. to 12-45 P.M.

ಗರಿಷ್ಠ ಅಂಕಗಳು : 125 ] [ Max. Marks : 125

## *ಪರೀಕ್ಷಾರ್ಥಿಗಳಿಗೆ ಸಾಮಾನ್ಯ ಸೂಚನೆಗಳು :*

1. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯು 63 ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ ಪ್ರಶ್ನೆಗಳನು-ಹೊಂದಿದೆ.
2. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನು-ಹಿಮ್ಮುಖ ಜಾಕೆಟ್ ಮೂಲಕ ಮೊಹರು (ಸೀಲ್) ಮಾಡಲಾಗಿದೆ. ಪರೀಕ್ಷೆ ಪ್ರಾರಂಭವಾಗುವ ಸಮಯಕ್ಕೆ ನಿಮ್ಮ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಬಲಬದಿ ಪಾರ್ಶ್ವವನು- ಕತ್ತರಿಸಿ, ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯಲ್ಲಿ ಎಲ್ಲಾ ಪುಟಗಳು ಇವೆಯೇ ಎಂದು ಪರೀಕ್ಷಿಸಿಕೊಳ್ಳಿ.
3. ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ ಪ್ರಶ್ನೆಗಳಿಗೆ ಕೊಟ್ಟಿರುವ ಸೂಚನೆಗಳನು-ಪಾಲಿಸಿ.
4. ಬಲ ಭಾಗದಲ್ಲಿ ಕೊಟ್ಟಿರುವ ಅಂಕಿಗಳು ಪ್ರಶ್ನೆಗಳಿಗಿರುವ ಪೂರ್ಣ ಅಂಕಗಳನು-ತೋರಿಸುತ್ತವೆ.
5. ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನು- ಓದಿಕೊಳ್ಳಲು 15 ನಿಮಿಷಗಳ ಕಾಲಾವಕಾಶವು ಸೇರಿದಂತೆ, ಉತ್ತರಿಸಲು ನಿಗದಿಪಡಿಸಲಾದ ಸಮಯವನು-ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಮೇಲ್ಭಾಗದಲ್ಲಿ ಕೊಡಲಾಗಿದೆ.

## *छात्रं प्रति सामान्यनियमाः*

1. अस्मिन् प्रश्नपत्रे त्रिषष्टिः (63) वस्तुनिष्ठाः व्यक्तिनिष्ठाश्च प्रश्नाः सन्ति ।
2. इदं प्रश्नपत्रं विपरीतेन आवरणेन मुद्रिताङ्कमस्ति । परीक्षासमये प्रश्नपत्रमुद्घाटयितुं कर्तय । प्रश्नपत्रस्य पृष्ठानि पूर्णानि सन्ति इति पर्यालोचय ।
3. व्यक्तिनिष्ठानां वस्तुनिष्ठानाञ्च प्रश्नानां विषये निर्दिष्टाः नियमाः अनुपालनीयाः ।
4. प्रश्नानां प्रति अधिकतयाः अङ्काः पार्श्वे लिखिताः सन्ति ।
5. प्रश्नपत्रमुत्तरयितुं निर्धारिता समयावधिः प्रश्नपत्रस्य उपरि भागे लिखितः अस्ति । यस्मिन् पञ्चदशपलानि प्रश्नपत्रस्य पठनार्थं निर्धारितानि सन्ति ।

इतः कर्तय

TEAR HERE TO OPEN THE QUESTION PAPER
प्रश्नपत्रमुद्घाटयितुमितः कर्तय

Tear here

## भागः - A

### ( गद्य-पद्य-पूरकपाठाः )

### ( 79 अङ्काः )

I. एकवाक्येन उत्तरं लिखत — 16 × 1 = 16

1. आकाशकायेषु आकर्षणीयः शक्तिस्वरूपः कः ?
2. शास्त्रिमहोदयः एम्०ए० पदवीं कुत्र प्राप्तवान् ?
3. भोजः कुत्र हन्तव्यः ?
4. किं किं शाश्वतं तिष्ठति ?
5. काः समुद्रे अस्तं गच्छन्ति ?
6. भारतीय भावना निरन्तरं किं ददाति ?
7. केषां विभूतयः परोपकाराय भवन्ति ?
8. कीदृशेन कर्मणा सौख्यं भवति ?
9. भगवतः दर्शनेन पुलकितः ध्रुवः किम् अकरोत् ?
10. रमणमहर्षेः कस्मिन् विषये अनास्था आसीत् ?
11. अञ्जना कीदृशं सुतं प्रासूत ?
12. वज्रायुधेन वृत्रं कः जघान ?
13. कः भूमिं परितः प्रदक्षिणं करोति ?
14. शैलशृङ्गवासिनी का ?
15. नाट्यस्य गरिमाणं कः अवर्णयत् ?
16. रमणमहर्षेः मातापितरौ कौ ?

II. चतुर्थपदं लिखत — 4 × 1 = 4

17. चरकः — जीवशास्त्रज्ञः :: आर्यभटः — ........................।
18. पादरहितः पदसमुदायः — गद्यम् :: गद्यपद्यमयी वाणी — .......................... ।
19. करुणः — रसः :: शोकः — .......................... ।
20. प्राणायामेन युक्तेन योगेन — सर्वरोगक्षयः :: अयुक्ताभ्यासयोगेन — .......................... ।

III. लघूत्तराणि संस्कृतभाषया लिखत — 5 × 2 = 10

21. पादपजातयः काः ? तासां जन्म कथं भवति ?

22. डा० सत्यव्रतशास्त्रिमहोदयेन प्राप्ताः देशीयाः प्रशस्तयः काः ?

23. सुमन्त्रप्रमुखाः दशरथाय किं व्यजिज्ञपन् ?

24. भीष्मेण दैवपुरुषकारयोः विषये किमुक्तम् ?

**अथवा**

मानवः निर्वेदं कथम् आप्नोति ? ततः सः किं कुरुते ?

25. दधीचेः तपोवनं कथम् आसीत् ?

IV. श्लोकतात्पर्यं कर्णाटकभाषया, आङ्ग्लभाषया, संस्कृतभाषया वा लिखत — 3 × 2 = 6

26. एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा ।
कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च ।।

27. चित्तशान्तिदायिनी विरक्तिबुद्धिवर्धिनी
भेदभावनाशिनी जनेषु चैक्यकारिणी ।
दुःखशोकहारिणी भवाम्बुधेश्च तारिणी ।
भारतीयभावना विवृद्धिमेतु भारते ।।

**अथवा**

यत्र कुत्र वा वयं समग्रभारते स्थिता
भाषयापि धर्मतश्च भिन्नमार्गमाश्रिताः ।
आदितश्च मध्यतस्तथान्ततश्च भारता
भारतीय भावनेति वृद्धिमेतु भारते ।।

28. आङ्गिको वाचिकश्चैव आहार्यः सात्त्विकस्तथा ।
चत्वारोऽभिनया ह्येते विज्ञेया नाट्यसंश्रयाः ।।

V. कव्योः देश-काल-कृतीनां विषये लिखत — 2 × 3 = 6

29. भरतमुनिः ।

30. भासः ।

VI. यथानिर्देशम् उत्तरं लिखत — 3 × 3 = 9

31. किं भवेत् ? मम समीपे ।
कः पाठः ? कः अवदत् ? कम् अवदत् ?

32. शरणागतरक्षणं धर्मः इति अस्माकं श्रद्धा ।
कः पाठः ? का अवदत् ? शरणागतः कः ?

**अथवा**

भवतु अस्माकं महाराज्ञी अभयदायिनी ।
कः पाठः ? के अवदन् ? महाराज्ञी का ?

33. किंस्वित् श्रेष्ठतरं भवेत् ?
कः पाठः ? कः अपृच्छत् ? कम् अपृच्छत् ?

VII. दशवाक्यैः उत्तरं कर्णाटकभाषया, आङ्ग्लभाषया, संस्कृतभाषया वा लिखत — 4 × 4 = 16

34. वत्सराजः भोजं कथं रक्षति ?

**अथवा**

किमर्थं मुञ्जः भोजं मारयितुं प्रयतते ?

35. पद्यानुगुणं हनूमतः जननं बाल्यवृत्तान्तञ्च सङ्गृह्य लिखत ।

36. 'नगाधिराजः' इति पाठे अमरनाथगुहाविषये का पुराणकथा अस्ति ? सङ्गृह्य लिखत ।

37. डा० सत्यव्रतशास्त्रिमहोदयस्य बाल्यजीवनं विवृणुत ।

VIII. श्लोकौ पूरयत — 2 × 4 = 8

38. मनीषिणः .................................................................................

..........................................................................................।

..........................................................................................

............................................................................ हितं च दुर्लभम् ।।

39. न चोरहार्यं .................................................................................

..........................................................................................।

..........................................................................................

............................................................................ धनप्रधानम् ।।

IX. अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरत — 4 × 1 = 4

40. महाभारतं संस्कृतभाषायाः सर्वश्रेष्ठं महाकाव्यम् । अस्य कर्ता भगवान् वेदव्यासः । ''महत्त्वात् भारवत्त्वाच्च महाभारतमुच्यते'' इति उक्तिः अस्य विषये प्रसिद्धा । महाभारतं 'पञ्चमो वेदः' इति विख्यातम् । कौरवपाण्डवानां कथादृष्ट्या महाभारतं लौकिकं काव्यम् । अवतारपुरुषस्य श्रीकृष्णस्य महिमवर्णनदृष्ट्या एतत् अलौकिकं काव्यम् । अत्र अनेकाः उपकथाः दृश्यन्ते । प्रसिद्धाः उपदेशाश्च अत्र सन्ति । श्रीमद्भगवद्गीता महाभारते एव विराजते । अत्र अर्जुनं प्रति कृष्णोपदेशः वर्तते । महाभारते धर्मराजं प्रति भीष्मोपदेशः धृतराष्ट्रं प्रति विदुरोपदेशश्च भवति ।

i) महाभारतस्य कर्ता कः ?

ii) महाभारतं किमिति विख्यातम् ?

iii) श्रीमद्भगवद्गीता कुत्र विराजते ?

iv) महाभारतं श्रीकृष्णस्य महिमवर्णनदृष्ट्या कीदृशं काव्यम् ?

## भागः - B

### (व्याकरणविभागः)

### (30 अङ्काः)

X. निम्नलिखितेषु प्रश्नेषु अपूर्णविवरणेषु वा प्रत्येकं चत्वारः विकल्पाः प्रदत्ताः । तेषु एकमेव शुद्धं उपयुक्तं वा वर्तते । सम्यक् उत्तरस्य चयनं कृत्वा लिखत — 10 × 1 = 10

41. 'बभासे' अत्र एषः लकारः भवति –
    (A) लट्  (B) लिट्
    (C) लोट्  (D) लृट् ।

42. 'शिष्टः' एतस्य विरुद्धार्थकपदम् इदं भवति –
    (A) दुष्टः  (B) परिशिष्टः
    (C) विशिष्टः  (D) अवशिष्टः ।

43. 'गौरियम्' अत्र विसर्गस्य स्थाने एषः आदेशः भवति –
    (A) सकारादेशः  (B) उकारादेशः
    (C) रेफादेशः  (D) लोपादेशः ।

44. उपनिषदः <u>शतशः</u> सन्ति - अत्र रेखाङ्कितपदस्य समुचितं प्रश्नवाचकपदम् इदं भवति –
    (A) कुत्र  (B) कति
    (C) कदा  (D) कथम् ।

45. 'अस्मन्मित्रम्' अत्र एषः सन्धिः अस्ति –
    (A) अनुनासिकसन्धिः  (B) जश्त्वसन्धिः
    (C) श्चुत्वसन्धिः  (D) अनुस्वारसन्धिः ।

46. 'रक्ष' अत्र एषः पुरुषः भवति –
    (A) उत्तमः  (B) प्रथमः
    (C) मध्यमः  (D) अन्यः ।

47. 'आनन्दः' अस्य समानार्थकपदम् इदं भवति –
    (A) सृष्टिः  (B) तुष्टिः
    (C) वृष्टिः  (D) दृष्टिः ।

48. एषु व्याकरणशुद्धं वाक्यम् इदं भवति –
    (A) कंसः कृष्णेन क्रुध्यति  (B) कंसः कृष्णात् क्रुध्यति
    (C) कंसः कृष्णे क्रुध्यति  (D) कंसः कृष्णाय क्रुध्यति ।

49. 'भाषासु' अत्र एषा विभक्तिः भवति –
    (A) सप्तमी  (B) द्वितीया
    (C) चतुर्थी  (D) षष्ठी ।

50. 'पिता' अस्य स्त्रीलिङ्गरूपम् इदं भवति –
    (A) नेता  (B) भ्राता
    (C) कर्ता  (D) माता ।

51. विग्रहवाक्यं विलिख्य समासनाम लिखत — 2 × 1 = 2

a) यथाक्रमम्

b) देवासुराः ।

**अथवा**

समासं कृत्वा समासनाम लिखत —

a) शूलं पाणौ यस्य सः =

b) करीणाम् इन्द्रः =

52. वाक्ये विद्यमानं कृदन्तपदं चित्वा प्रत्ययस्य नाम लिखत — 2 × 1 = 2

a) मुकुटं विधातुं यतिष्ये ।

b) बालेन पाठः पठनीयः ।

53. प्रयोगपरिवर्तनं कुरुत — 2 × 1 = 2

a) छात्रः कथां लिखति ।

b) अध्यापकेन प्रश्नः पृष्टः ।

54. सन्धिं विभज्य नाम लिखत — 2 × 1 = 2

a) यतिस्सः

b) भवतीति ।

55. लिङ्गविभक्तिवचनानि लिखत — 2 × 1 = 2

a) वयम्

b) कर्मणा ।

56. लकारपुरुषवचनानि लिखत — 2 × 1 = 2

a) यतिष्ये

b) आज्ञापयति ।

57. रेखाङ्कितपदम् अवलम्ब्य प्रश्ननिर्माणं कुरुत — 2 × 1 = 2

a) भाग्यानि <u>काले</u> फलन्ति ।

b) <u>शल्यकर्णौ</u> रथारोहणं कुरुतः ।

XI. वाक्ये विद्यमानं अलङ्कारं सलक्षणं विवृणुत — 3

58. गङ्गा गङ्गेव पावनी ।

XII. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत — 3

59. सुबद्धमूला निपतन्ति पादपाः ।

# भागः - C

## (रचनाविभागः)

## (16 अङ्काः)

XIII. संस्कृतभाषया अनुवादं कुरुत — 3

60. ಮಾನವನ ಜೀವನದಲ್ಲಿ ಶಿಕ್ಷಣದ ಪಾತ್ರವು ಮಹತ್ತ್ವಪೂರ್ಣವಾದುದು. ಶಿಕ್ಷಣವಿಲ್ಲದೆ ಇಂದು ಜೀವನವು ಕಷ್ಟಸಾಧ್ಯವು. ಆದ್ದರಿಂದ ಎಲ್ಲರಿಗೂ ಶಿಕ್ಷಣವು ಅನಿವಾರ್ಯವಾಗಿದೆ.

Role of education is most prominent in man's life. Life is difficult without education today. Therefore education is essential for everyone.

XIV. कर्णाटकभाषया, आङ्ग्लभाषया वा अनुवादं कुरुत – 3

61. सन्तोषः एव मानवस्य परं धनम् अस्ति । सन्तोषयुतः मानवः सर्वं कार्यं साधयति । सन्तोषरहितः नरः किमपि साधयितुं न शक्नोति । अतः सदा सन्तोषयुतः भवेत् ।

XV. पत्रं लिखत – 5

62. हासननगरस्य सर्वकारीयप्रौढशालायाः आनन्दः/अनुपमा इति मत्वा कारणं संसूच्य दिनद्वयं विरामं प्रार्थ्य वर्गोपाध्यायं प्रति विरामपत्रं लिखत ।

**अथवा**

'हितोपदेशः' इति पुस्तकं प्रेषयितुं निवेद्य मैसूरुनगरस्य गीताप्रकाशनस्य व्यवस्थापकं प्रति आवेदनपत्रं लिखत ।

XVI. 63. एकं विषयम् अधिकृत्य प्रबन्धं लिखत – 5

i) परिसरमालिन्यम्

ii) जनसंख्यास्फोटः

iii) समाचारपत्रम् ।